**हितकारिन्** त्रि॰ हितं करोति कृ-णिनि । शुभकारके ।
**हितप्रणी** पु॰ हितं प्रणयति प्र+णी क्विप् । चारे शब्दर॰ ।
**हितावली** स्त्री हितम् आवलयति आ+वल-इन् ङीप् । ओषधिभेदे अमरः । [कारिणि स्त्रियां ङीप् ।
**हितैषिन्** त्रि॰ हितमिच्छति इष-णिनि । हितेच्छा-
**हितोपदेश** पु॰ हितस्य इष्टसाधनस्य उपदेशः । १हितस्य उपदेशे विष्णुशर्मकृते २नीतिग्रन्थभेदे च ।
**हिन्ताल** पु॰ हीनस्तालो यस्मात् पृषो॰ । (हेँताल) वृक्षे अमरः "हिन्तालो मधुराम्लश्च कफकृत् पित्तदाहनुत् । श्रमतृष्णापहारी च शिशिरो वातदोषकृत्" राजनि॰ ।
**हिन्दोल** पु॰ हिल्लोल+घञ् पृषो॰ । १श्रावणशुक्लपक्षविहिते दोलनयन्त्रेण भगवतो दोलनरूपे २उत्सवभेदे ३रागभेदे च सङ्गीतदा॰ । ४दोलायां स्त्री स्वार्थे क । यानभेदे जटा॰ ।
**हिन्दु** पु॰ हीनं दूषयति दुष+डु पृषो॰ । जातिभेदे । "पश्चिमाम्नायमन्त्रास्तु प्रोक्ताः पारस्यभाषया । अष्टोत्तरशताशीतिर्येषां संसाधनात् कलौ । पञ्च खानाः सप्त मीरा नव शाहा महाबलाः । हिन्दुधर्मप्रलोप्तारो जायन्ते चक्रवर्त्तिनः । हीनञ्च दूषयत्येव हिन्दुरित्युच्यते प्रिये ! । पूर्वाम्नाये नवशतं षडशीतिः प्रकीर्त्तिताः । फिरिङ्गभाषया मन्त्रास्तेषां संसाधनात् कलौ । अधिपा मण्डलानाञ्च संग्रामेष्वपराजिताः । इंरेजा नवषट् पञ्च लण्ड्जाश्चापि भाविनः" मेरुतन्त्रे २३प्र॰ । अप्रमाणमिदम् ।
**हिम** न॰ हि-मक् । १आकाशच्युते जलकणे २शीतलस्पर्शे ३तद्वति त्रि॰ अमरः । ४सूक्ष्मैलायां ५रेणुकायां ६भद्रमुस्तायाम् ७नागरमुस्तायां ८पृक्कायां ९चविकायां च स्त्री राजनि॰ । १०अग्रहायणपौषमासात्मके ऋतुभेदे ११चन्दनवृक्षे पु॰ हेमच॰ १२कर्पूरे पु॰ राजनि॰ । [(बरफ) पदार्थे च अमरः ।
**हिमक** पु॰ हिमेन कायति कै-क । विकङ्कतवृक्षे राजनि॰ ।
**हिमकर** पु॰ हिमः करः किरणो यस्य हिमं करोति निमित्तत्वात् कृ-अच् वा । १चन्द्रे २कर्पूरे च राजनि॰ । हिमकिरणादयोऽप्यत्र ।
**हिमकूट** पु॰ हिमस्य कूटं यत्र । १शिशिरर्त्तौ राजनि॰ हिमप्रचुरं कूटमस्य । २हिमगिरौ हिमालयपर्वते ।
**हिमगिरि** पु॰ हिममयो गिरिः हिमप्रधानो वा गिरिः । हिमालयपर्वते हिमपर्वतादयोऽप्यत्र ।
**हिमज** पु॰ हिमात् हिमालयात् जायते जन-ड । १मैनाकपर्वते । २पार्वत्यां ३शठ्यां स्त्री मेदि॰ । हिमे हिमकाले जायते जन-ड । ४क्षीरिण्यां लतायां स्त्री राजनि॰ ।
**हिमझटि** पु॰ झटि इव ६त॰ । कुज्झटौ हारा॰ ।
**हिमतैल** पु॰ हिमवीर्य्यं तैलम् । कर्पूरजाते तैले राजनि॰ ।
**हिमदुग्धा** स्त्री हिमवीर्य्यकरं दुग्धमस्याः । क्षीरिण्याम् राजनि॰ ।
**हिमदुर्द्दिन** न॰ हिमहेतुकं दुर्द्दिनम् शाक॰ । हिमपातेन दुःखकरे दिने कुज्झटिकायुक्तदिने त्रिका॰ ।
**हिमद्रुम** पु॰ हिमप्रधाने जायमानः द्रुमः । निम्बवृक्षे [राजनि॰
**हिमप्रस्थ** पु॰ हिमः शीतलः प्रस्थो यस्य । हिमालयपर्वते हेमच॰ ।
**हिमबालुक** पु॰ हिममयी बालुकेव अंशो यस्य । कर्पूरे [राजनि॰ ।
**हिमबालुका** स्त्री हिमस्य बालुकेव । कर्पूरे अमरः ।
**हिमवत्** पु॰ हिमानि प्राचुर्य्येण सन्त्यस्य मतुप् मस्य वः । हिमालयपर्वते हेमच॰ ।
**हिमवत्सुत** पु॰ ६त॰ । १मैनाकपर्वते २गङ्गायाम् ३उमायाञ्च स्त्री । "गङ्गा हिमवतो जज्ञे सर्वलोकैकपावनी । स योगाग्निबलाद्देवीं लेभे पुत्रीं महेश्वरीम्" देवीपु॰१२अ॰ ।
**हिमशर्करा** पु॰ हिमप्रधाना शर्करा शा॰त॰ । यावनाले राजनि॰ ।
**हिमशैल** पु॰ हिमप्रधानः शैलः । हिमाचले ।
**हिमशैलजा** स्त्री हिमशैलाज्जायते जन-ड । १उमायां शब्दर॰ २गङ्गायाम् ।
**हिमसंहति** स्त्री ६त॰ । १हिमसमूहे २हिमेन क्षतसङ्घाते
**हिमहासक** पु॰ हिमं हसति शीतवीर्य्यत्वात् हस-ण्वुल् । हिन्तालवृक्षे जटा॰ । [राजनि॰ ।
**हिमांशु** पु॰ हिमा अंशवोऽस्य । १चन्द्रे अमरः २कर्पूरे च
**हिमांशुशिख** न॰ हिमांशोरिव शिखा शोभा यस्य । रौप्ये हेमच॰ । तस्य अतिशुक्लत्वात् तथात्वम् ।
**हिमागम** पु॰ हिमस्यागमो यत्र । हेमन्ते अग्रहायणपौषमासात्मके ऋतौ राजनि॰ ।
**हिमाद्रिजा** स्त्री हिमाद्रौ हिमाद्रेर्वा जायते जन-ड । १क्षीरिण्यां राजनि॰ । २पार्वत्यां ३गङ्गायाञ्च ।
**हिमाद्रितनया** स्त्री ६त॰ । १दुर्गायां २गङ्गायाञ्च हिमाद्रिसुतादयोऽप्यत्र । ३मैनाके पु॰ ।
**हिमानी** स्त्री हिमानां संहतिः हिम+ङीप् आनुक् च । हिमसमूहे अमरः "आगता वत जरेव हिमानी" उद्भटः ।
**हिमाराति** पु॰ ६त॰ । १सूर्य्ये २वह्नौ मेदि॰ ३अर्कवृक्षे ४चित्रकवृक्षे च ।